Roll No. [ ]

Total Printed Pages : 8 | Total Questions : 23

Time : 3 Hours | Maximum Marks : 80

हायर सेकेण्डरी परीक्षा / Higher Secondary Examination

(मुख्य / Main) वर्ष / Year - 2026

**263740**

**D**

SET / सेट

# संस्कृत

# SANSKRIT

---

**निर्देशा :**

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–भाषायां लिखत।

1 प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत – 1×7=7

(क) 'पठति' पदे _______ अस्ति। (एकवचनं / बहुवचनं)

(ख) 'गमिष्यति' पदे _______ लकारः अस्ति। (लट् / लृट्)

(ग) 'लङ् लकारस्य' उदाहरणम् _______ अस्ति। (अपठत् / पठतः)

(घ) 'लभते' इति क्रियापदे धातुः _______ अस्ति। (लभत / लभ्)

(ङ) 'प्रभवति' पदे उपसर्गः _______ अस्ति। (प्र / प्रभ)

(च) 'दुर्लभः' पदे _______ उपसर्गः अस्ति। (दुर् / दुस्)

(छ) 'पर्यपालयत्' पदे _______ उपसर्गः अस्ति। (परि / परा)



THE BOARD STUDY | TheBoardStudy.com

2 उचितं मेलनं कुरुत –

| | (अ) | | (आ) |
|---|---|---|---|
| (क) | कृत्वा | (i) | अव्ययपदं |
| (ख) | गतः | (ii) | सर्वत्र |
| (ग) | अजा | (iii) | क्त्वा |
| (घ) | अद्य | (iv) | इव |
| (ङ) | 'पवनः सर्वत्र अस्ति' अत्र अव्ययं अस्ति | (v) | टाप् |
| (च) | सा माता इव रक्षति अस्मिन् वाक्ये अव्ययं अस्ति | (vi) | क्त। |

3 एकपदेन उत्तरं लिखत –

(क) 'रात्रिः' पदस्य पर्यायपदं लिखत।

(ख) 'भवनम्' पदस्य पर्यायपदं लिखत।

(ग) 'सत्यम्' पदस्य विलोमपदं लिखत।

(घ) 'एकः' पदस्य विलोमपदं लिखत।

(ङ) आचार्यः कम् अनुशास्ति ?

(च) शरीरे कः प्रहरति ?

(छ) कः गुणं वेत्ति ?

4 शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – 1×6=6

(क) 'प्रति' योगे द्वितीया विभक्तिः भवति।

(ख) अपादानकारके पञ्चमी विभक्तिः भवति।

(ग) 'राजेन्दुः दिलीपः' इत्यत्र 'दिलीपः' विशेषणम् अस्ति।

(घ) 'कठोरैः भाषणैः' इत्यत्र 'भाषणैः' विशेष्यं अस्ति।

(ङ) 'अल्पज्ञः पुरुषः' इत्यत्र 'अल्पज्ञः' विशेषणम् अस्ति।

(च) 'गंभीरः ज्ञानोदधिः' इत्यत्र 'ज्ञानोदधिः' विशेष्यं अस्ति।



THE BOARD STUDY | TheBoardStudy.com

5 उचितं विकल्पं चित्वा लिखत : 1×6=6

(क) द्वन्द्वसमासस्य उदाहरणम् अस्ति –

(i) पितरौ (ii) दशाननः

(iii) पञ्चवटी (iv) घनश्यामः

(ख) 'सभायां पण्डितः' पदयोः सामासिकपदम् अस्ति –

(i) सभायाः पण्डितः (ii) सभास्य पण्डितः

(iii) सभापण्डितः (iv) सभे पण्डितः

(ग) 'त्रिविधम्' पदे समासः अस्ति –

(i) द्वन्द्वः समासः (ii) द्विगुः समासः

(iii) कर्मधारयः समासः (iv) अव्ययीभावः समासः

(घ) 'हस्तेनैव' पदस्य सन्धिः विच्छेदम् अस्ति –

(i) हस्तेन + एव (ii) हस्ते + नैव

(iii) हस्त + एनैव (iv) हस्ते + नेव

(ङ) 'योगेनान्ते' इति पदे सन्धिः अस्ति –

(i) व्यञ्जन् सन्धिः (ii) विसर्ग सन्धिः

(iii) दीर्घ–स्वर–सन्धिः (iv) गुणस्वर सन्धिः

(च) 'सत्यपि' पदस्य विच्छेदः अस्ति –

(i) सति + अपि (ii) स + त्यपि

(iii) सत्य + पि (iv) सत् + अपि

6 रविः रसं किमर्थं आदत्ते ?

अथवा

शिवगणाः कीदृशाः आसन् ? 2

7 केन कुलम् विभाति ?

अथवा

हल्दीघाटी केषां स्थली अस्ति ? 2

8 नरकेऽशुचौ के पतन्ति ?

अथवा

त्रिविधम् कस्य द्वारम् अस्ति ?

Next Page



THE BOARD STUDY | TheBoardStudy.com

9 वेदाः कति सन्ति? तेषाम् नामानि लिखत। 2

**अथवा**

वेदाङ्गानि कति सन्ति? तेषाम् द्वयोः वेदाङ्गयोः नाम लिखत।

2

10 काभ्याम् न प्रमदितव्यम्?

**अथवा**

रामस्य अभिषेकः कथम् निवृतः?

2

11 दशकुमारचरितस्य लेखकः कः? ग्रन्थेऽस्मिन् कति भागाः सन्ति?

**अथवा**

'पञ्चतन्त्रः' कस्य रचना अस्ति? अस्मिन् कति तन्त्राः सन्ति?

12 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्व पाठ्यपुस्तकस्य एकं सुभाषितं श्लोकं लिखत। 2

13 अधोलिखितेषु द्वयोः वाक्योः रेखांकितपदान्याधृत्य प्रश्ननिर्माणं कुरूत - $1 \times 2 = 2$

(क) मया एकाकिना गन्तव्यम्।

(ख) दौवारिकस्य पृष्ठे हस्तं विन्यस्यन् सन्यासिरुपो गौरसिंहः अवदत्।

(ग) पितरः जन्महेतवः आसन्।

14 अधोलिखितेषु वाक्येषु द्वयोः वाक्योः कः 'कम्' प्रति कथयति इति लिखत - $1 \times 2 = 2$

(क) न शक्नोमि रोषं धारयितुम्।

(ख) त्वं तु केवल विद्याध्ययने एव रता।

(ग) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्।

15 'शिशुपालवधम्' कस्य रचना अस्ति? अस्मिन् कति सर्गाः सन्ति? 2

**अथवा**

'रघुवंशं' कस्य कृतिः अस्ति? अस्मिन् कति सर्गाः सन्ति?



THE BOARD STUDY | TheBoardStudy.com

16 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 1×3=3

अजीर्णे भेषजं वारि, जीर्णे वारि बलप्रदम्।
भोजने चामृतं वारि, भोजनान्ते विषापहम्।

प्रश्नाः –

(क) अजीर्णे किम् भेषजं अस्ति ?

(ख) भोजनान्ते किम् विषम् ?

(ग) वारि कदा बलप्रदं भवति ?

**अथवा**

दैवी संपद् विमोक्षाय निबन्धायासुरी मता।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव॥

प्रश्नाः –

(क) दैवी संपद् कस्मै मता ?

(ख) आसुरी संपद् कस्मै मता ?

(ग) कां संपदं अभिजातः मा शुचः असि ?

17 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 1×3=3

काञ्चुकीयः – परित्रायतां परित्रायतां कुमारः।

रामः – आर्य! कः परित्रातव्यः ?

काञ्चुकीयः – महाराज!

रामः – महाराजः इति। आर्य! ननु वक्तव्यम्। एक शरीर – संक्षिप्ता पृथिवी रक्षितव्येति। अथ कुतः उत्पन्नोऽयं दोषः।

काञ्चुकीयः स्वजनात्।

प्रश्नाः –

(क) एक शरीर–संक्षिप्ता का रक्षितव्या ?

(ख) कुतः अयं दोषः उत्पन्नः ?

(ग) कः परित्रातव्यः ?

**अथवा**

कुण्डला – सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता, कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि ?

मदालसा ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

प्रश्नाः –

(क) का विद्याध्ययने रता ?

(ख) कः अनन्तपारो गभीरश्च ?

(ग) मदालसया कुत्र स्थित्वा कतिपयबिन्दव एव प्राप्ता ?



THE BOARD STUDY | TheBoardStudy.com

18 केचन त्रीणि रिक्तस्थानानि पूरयत –

(क) एषा ________ ।

(ख) यथा ते तत्रवर्तेरन् ________ ।

(ग) एकेन अपि ________ साधुना।

(घ) ________ पुराणानि।

(ङ) विद्या ________ ददाति।

19 अधोलिखितं गद्यांशं पठित्वा प्रश्नां उत्तराणि संस्कृतभाषायां लिखत – 1×3=3

सम्वृत्ते किञ्चिदन्धकारे भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत–प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषित्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकमन् गम्भीर स्वरेणैवम् अवादीत् – 'कः कोऽत्र भोः कः कोऽत्र भो?' इति।

**प्रश्नाः –**

(क) प्रतापदुर्गदौवारिकः कस्य ध्वनिम् इव अश्रौषित्?

(ख) सः का स्कन्धे निधाय निपुणं निरीक्षमाणः?

(ग) गम्भीर स्वरेणैवम् कः अवादीत्?

अथवा

पुरा धाराराज्ये सिन्धुल–संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये 'भोज' इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामासयद्यहं राज्यलक्ष्मीभारधारण समर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः।

**प्रश्नाः –**

(क) भोजः कस्य पुत्रः आसीत्?

(ख) सिन्धुलः किम् विचारयामास?

(ग) धाराराज्ये कः राजा प्रजाः पर्यपालयत्?



THE BOARD STUDY | TheBoardStudy.com

20 प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरूत – 4

(नो, अलूक्षा, ते, सुचरितानि, कर्माणि, तत्र, आदेशः, एषः)

यान्यनवद्यानि ………… तानि सेवितव्यानि, ………… इतराणि। यान्यस्माकं ………… तानि त्वयोपास्यानि, नो इतराणि। अथ ………… कर्मविचिकित्सा वा वृत्तविचिकित्सां वा स्यात्, ये ………… ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, ………… धर्मकामाः स्युः। एषः …………। ………… उपदेश।

**अथवा**

(वेदाः, चाथर्वणं, यजूंषि, सगीतयः, धनुर्वेद, द्रौहिणीः, उपवेदाः, गेयवेदः।)

तत्रार्थव्यवस्थितपादाः ऋचः। ताः ………… सामानि। अच्छन्दांस्यगीतानि …………। ऋचौ यजूंषि सामानि ………… त इमे चत्वारो …………। इतिहासवेदः ………… गन्धर्ववेद आयुर्वेदः च …………। वेदोपवेदात्मा सार्ववर्णिकः पञ्चमो ………… इति …………।

TheBoardStudy.com

21 अधोलिखितेषु एकस्य कवेः परिचयं शतशब्देषु संस्कृतभाषाया लिखत – 4

(i) आदिकविः https://www.mpboardonline.com

(ii) कविकुल चूडामणिः

(iii) मम प्रियः संस्कृतकविः

(iv) श्रीहर्षः

22 अधोलिखितं अपठित गद्यांशं पठित्वा प्रश्नानां उत्तराणि संस्कृतभाषायां लिखत – 4

(केचन चत्वारः)

न्यायो भवति प्रमाणाधीनः। प्रमाणं विना न्यायं कर्तुं न कोऽपि क्षमः सर्वत्र। न्यायालयेऽपि न्यायाधीशाः यस्मिन् कस्मिन्नपि विषये प्रमाणाभावे निर्णयं विधातुं न समर्थाः भवन्ति। अत एव अस्मिन् पाठे चौर्याभियोगे न्यायाधीशः प्रथमतः साक्ष्यं विना निर्णेतुं नाशक्नोत्। अपरेद्युः यदा स शवः न्यायाधीशं सर्वं सप्रमाणं निवेदितवान्। तदा सः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।



THE BOARD STUDY | TheBoardStudy.com

**प्रश्नाः –**

(क) प्रमाणाधीनः कः भवति?

(ख) किम् विना न कोऽपि न्यायं कर्तुम् क्षमः?

(ग) कस्य अभावे न्यायाधीशाः निर्णयं विधातुं न समर्थाः भवन्ति?

(घ) स शवः न्यायाधीशं किम् निवेदितवान्?

(ङ) कं ससम्मानं मुक्तवान्?

(च) कस्यै कारादण्डम् अददात्?

23 स्व प्राचार्यस्य कृते अवकाशार्थं संस्कृतभाषायां एकं प्रार्थना-पत्रं लिखत। 4

अथवा

स्व-मित्रं प्रति एक पत्रं संस्कृतभाषायां लिखत।

THE BOARD STUDY | TheBoardStudy.com